योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ३४

चतुस्त्रिंशः सर्गः ३४

श्रीवसिष्ठ उवाच ।

अत्र ते श्रृणु वक्ष्यामि दामादिषु गतेष्वथ ।

यद्वृत्तं शम्बरस्यैव नगरे नगसंनिभे ।। १

तथा गगनविभ्रष्टे समस्ते ध्वस्तसंस्थितौ ।

विनष्टे शम्बरानीके शरदीवाब्दमण्डले ।। २

देवनिर्जितसैन्योऽसौ नीत्वा कतिपयाः समाः ।

पुनर्देववधोयुक्तश्चिन्तयामास दानवः ।। ३

दामादयस्तु रचिता ये मया माययाऽसुराः ।

मौर्ख्यातैर्भाविता युद्धे मिथ्यैव दुरहंकृतिः ।। ४

इदानीं संसृजाम्यन्यान्दानवान्माययोदितान् ।

तानप्यध्यात्मशास्त्रज्ञान्सविवेकान्करोम्यहम् ।। ५

ततस्तत्त्वपरिज्ञानान्मिथ्याभावनयोज्झिताः ।

नाहंकारं प्रयास्यन्ति विजेष्यन्ति च तान्सुरान् ।। ६

इति संचिन्त्य दैत्येन्द्रस्तादृशान्दानवान्धिया ।

माययोत्पादयामास बुद्बुदानिव वारिधिः ।। ७

सर्वज्ञा वेद्यवेत्तारो वीतरागा गतैनसः ।

यथाप्राप्तैककर्तारो भावितात्मान उत्तमाः ।। ८

भीमो भासो दृढ इति नामभिः परिलाञ्छिताः ।

जगत्तृणमिवाशेषं पश्यन्तः पावनाशयाः ।। ९

ते दैत्या भुवनं प्राप्य च्छादयामासुरम्बरम् ।

गर्जन्तो हेतितडितः प्रावृषीव पयोधराः ।। १०

अयुध्यन्त समं देवैरपि वर्षगणान्बहून् ।

विवेकवशतो जग्मुर्नाहंकारं कदाचन ।। ११

तेषां यावदुदेत्यन्तर्ममेदमिति वासना ।

तावत्कोऽयमहं चेति विचाराद्यात्यसत्यताम् ।। १२

असच्छरीरं विबुधाः कोऽसावहमिति स्थितिः ।

विचारादित्थमेतेषां प्रोदगुर्न भयादयः । ।। १३

असच्छरीरं नास्तीदं चिच्छुद्धैवात्मनि स्थिता ।

अहं नाम न चान्योऽस्ति निश्चित्यैवासुरा ययुः ।। १४

ततस्तैर्निरहंकारैर्जरामरणनिर्भयैः ।

प्राप्तार्थकारिभिर्धीरैर्वर्तमानानुसारिभिः ।। १५

असक्तबुद्धिभिर्नित्यं हतान्यैरप्यहन्तृभिः ।

वासनाजालनिर्मुक्तैः कृतकार्यैरकर्तृभिः ।। १६

प्रभोः कार्यमिदं कार्यमिति संगरतत्परैः ।

वीतरागैर्गतद्वेषैः सर्वदा समदृष्टिभिः ।। १७

सा दैवी दानवैः सेना भीमभासदृढादिभिः ।

हता भुक्ता हृता पुष्टा स्वान्नश्रीरिव भोक्तृभिः ।। १८

भीमभासदृढक्षुण्णा जाता गीर्वाणवाहिनी ।

परिदुद्राव वेगेन गङ्गेव हिमवच्च्युता ।। १९

सा सुरानीकिनी देवं क्षीरोदार्णवशायिनम् ।

जगाम शरणं शैलं वातार्तेवाब्दमालिका ।। २०

हरिराश्वासयामास तां भीतां देववाहिनीम् ।

भुजङ्गाभिवृतामेकां रमणीमिव नायकः ।। २१

अथ क्षीरोदकुहरे तावत्सा सुरवाहिनी ।

उवास यावद्भगवांस्तन्निरासार्थमुद्ययौ ।। २२

बभूव दारुणं युद्धं शौरिशम्बरयोस्ततः ।

अकाल इव कल्पान्ते समुड्डीनकुलाचलम् ।। २३

शशाम समरे तस्मिन्दैत्यः सबलवाहनः ।

नारायणहतो यातः शम्बरो वैष्णवीं पुरीम् ।। २४

भीमभासदृढास्ते तु तस्मिन्विषमसंगरे ।

विष्णुनैव शमं नीताः पवनेनेव दीपिकाः ।। २५

ते हि निर्वासना एव यदा शान्तिमुपागताः ।

न तदैषां गतिर्ज्ञाता दीपानामिव शाम्यताम् ।। २६

तस्माद्वासनया बद्धं मुक्तं निर्वासनं मनः ।

राम निर्वासनीभावमाहरस्व विवेकतः ।। २७

सम्यगालोकनात्सत्याद्वासना प्रविलीयते ।

वासनाविलये चेतः शममायाति दीपवत् ।। २८

न सत्यं किंचिदेवेह सद्भावो भावयत्यलम् ।

नास्त्येव भावना तस्मादित्येतत्सम्यगीक्षणम् ।। २९

आत्मैवेदं जगत्सर्वं कः किं भावयतु क्व वा ।

भावना नाम नास्त्वेव तदेतत्सम्यगीक्षणम् ।। ३०

वासनाचित्तनामानौ शब्दावर्थसमन्वितौ ।

सत्यावलोकनाद्यत्र विलीनौ तत्परं पदम् ।। ३१

वासनावलितं चित्तमिह स्थितिमुपागतम् ।

तदेव तद्विनिर्मुक्तं विमुक्तमिति कथ्यते ।। ३२

नानाघटपटाकारैश्चेतःस्थितिमुपागतम् ।

तदेवाशु शमं नेयं मिथ्यायक्ष इवोत्थितः । ३३

दामव्यालकटाकारैश्चेतः परिणतं यथा ।

भीमभासदृढन्यायो राघवास्त्वचलस्तव । ३४

दामव्यालकटन्यायो मा ते भवतु राघव ।

एतद्राम पुरा प्रोक्तं पित्रा कमलजेन मे ।। ३५

भवते यन्मया प्रोक्तं शिष्यायात्यन्तधीमते ।

दामव्यालकटन्यायस्तस्मान्मा तेऽस्तु राघव ।

भीमभासदृढन्यायो नित्यमस्तु तवानघ ।। ३६

अविरलसुखदुःखसंकटेयं

भवपदवी भवतापनोपयाता ।

व्यवहरणवतो विभूतियातौ

सततमसक्ततयैव नश्यतीति। ।। ३७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० स्थितिप्रकरणे दामव्यालकटोपाख्यानसमाप्तिर्नाम चतुस्त्रिंशः सर्गः ।। ३४ ।।